जन्यचैतन्यप्रतिविम्बस्य वाऽन्तःकरणोज्ज्वलनरूपत्वात्। न तु चैतन्यमन्तःकरणे संक्रामति येन सङ्गिता स्यात्॥ अग्नेरपि हि प्रकाशादिकं न लौहे संक्रामति, किन्त्वग्निसंयोगविशेष एव लौहस्योज्ज्वलनमिति। नन्वेवमपि संयोगेन परिणामित्वमिति चेन्न सामान्यगुणातिरिक्तधर्म्मोत्पत्तावेव परिणामव्यवहारादिति। अयं च संयोगविशेषोऽन्तःकरणस्यैव सत्त्वोद्रेकरूपात् परिणामाद्भवतीति फलबलात् कल्प्यते पुरुषस्यापरिणामित्वेन संयोगे तन्निमित्तकविशेषासम्भवादिति। अयमेव च संयोगविशेषो बुद्ध्यात्मनोरन्योऽन्यप्रतिविम्बने हेतुरिति" सा०प्र०भा०। अन्तःकरणस्य च वृत्तयस्त्रिधा "शान्ताघोरास्तथामूढा मनसो वृत्तयस्त्रिधा। वैराग्यं क्षान्तिरौदार्य्यमित्याद्याः शान्तवृत्तयः। तृष्णा स्नेहोरागलोभावित्याद्या घोरवृत्तयः। सम्मोहोभयमित्याद्या कथिता मूढ़वृत्तयः" इति तास्वेव वृत्तिषु ज्ञानत्वोपचारात् तत्साधनत्वमिन्द्रियाणाम् "अन्तःकरणवृत्तौ ज्ञानत्वोपचारादिति" पञ्चपादिकाविवरणम्। शान्तादीनामेव सात्विक्यादिरूपेण व्यवहारः। ताश्च वृत्तयः "क्रमशोऽक्रमशश्च वृत्तय इति सां०सू० उक्तेः युगपदपि भवन्तीति सांख्यादयः। नैयायिकादयस्तु "अयौपद्याज्ज्ञानाना"मित्युक्तेः क्रमिकत्वमेवाङ्गीचक्रुः। तच्चान्तःकरणमणुपरिमाणमिति नैयायिकादयः। यावद्देहकार्य्यकारित्वात् जलावगाहे एकदैव सर्वदेहगतशैत्याद्युपलब्धेर्मध्यपरिमाणमिति सांख्यादयः। तेषां च चतुर्णां चन्द्रचतुर्मुखशङ्कराच्युता अधिष्ठातारोदेवा इति।

**अन्तःकुटिल** पु० अन्तर्मध्ये कुटिलः। वक्राकारमध्यावयववति शङ्खे। वक्रान्तःकरणे त्रि०।

**अन्तःकृमि** पु० अन्तरभ्यन्तरे कृमिर्यस्य। (गुटि) इति ख्याते कृमिकोषफले। मध्यस्थकृमियुक्ते फलादौ त्रि०।

**अन्तःकोटरपुष्पी** स्त्री अन्तःकोटरे अभ्यन्तरे पुष्पं यस्याः जातित्वात् ङीप्। अन्तःकोटरपुष्पवत्यां नीलवुह्नायाम्।

**अन्तःपदवी** स्त्री ७त०। सुषुम्णामध्यगते पथि।

**अन्तःपशु** पु० अन्तःग्राममध्ये पशवो यत्र। ग्राममध्ये पशुस्थितिकाले प्राह्णे, सायाह्ने च "अन्तःपशौ पशुकामस्य सायं प्रातः" कात्या० ४,१५,१४। "अन्तःपशौ काले ग्राममध्ये पशवो यस्मिन् काले, सायं पशुषु ग्राममध्येषु आगतेषु, प्रातश्च ग्रामादनिःसृतेष्विति" तद्व्या०।

**अन्तःपात** पु० अन्तर्मध्ये पततीति पत—कर्त्तरि ण। सन्धिस्थाने। भावे घञ्। मध्यपतने।

**अन्तःपातिन्** त्रि० अन्तःपतति पत—णिनि ६त०। मध्यप्रविष्टे। स्त्रियां ङीप्।

**अन्तःपात्य** पु० अन्तर्मध्ये पात्यते पत—णिच्—आधारे यत्। मध्ये पातनाधारे देशे "अन्तःपूर्व्वेण यूपं परीत्यान्तःपात्यदेशे स्थापयतीति" कात्या० १५,६,२२, "स्थापितगवानां पतये स्वभ्रात्रे द्रव्यं शतमधिकं वा दत्त्वा यूपात् पूर्व्वदिशि परीत्यान्तःपात्यदेशे स्थापयेदिति" वेददीपः।

**अन्तःपुर** न०अन्तरभ्यन्तरं पुरं गृहं कर्म्म०। (अन्दर) इति प्रसिद्धे राज्ञां स्त्रीणां स्थानयोग्ये गृहे। "त्रितयमिदमपूर्बं दृष्टमन्तःपुरे ते" इत्युद्भटः "व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत् इति" भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपुरे सहेति। "अन्तःपुरप्रचारञ्च प्रणिधीनाञ्च चेष्टितमिति" च मनुः। तत्र स्थितत्वात् राजमहिलायामपि। "दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदेति" शकु०। पुरशब्दसमासे अचि स्त्रीत्वात् ङीप्। अन्तःपुरीत्यपि स्त्री।

**अन्तःपुरचर** पु०अन्तःपुरे चरति चर—ट ७त०। राजान्तःपुरचारिणि कञ्चुक्यादौ। अन्तःपुरस्त्रियाम् स्त्री ङीप्।

**अन्तःपुरसहाय** पु० अन्तःपुरे सहायः। राज्ञामन्तःपुरसहचरे विदूषकादौ।

**अन्तःपुराध्यक्ष** पु० ६त०। "वृद्धः कुलोद्गतः शक्तः पितृपैतामहः शुचिः। राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते" इति नरपत्युक्तलक्षणेऽन्तःपुराधिकृते। अन्येऽपि पञ्च तथा, "पञ्चापरे वामनको जघन्यः कुब्जोऽपरो मण्डलकोऽथ सामी। पूर्व्वोक्तभूपानुचरा भवन्ति सङ्कीर्णसंज्ञाः शृणु लक्षणैस्तान्॥ सम्पूर्णाङ्गो वामनो (१) भग्नपृष्ठः किञ्चिच्चोरुर्मध्यकक्षान्तरेषु। ख्यातो राज्ञो ह्येष भद्रानुजीवी स्फीतो दाता वासुदेवस्य भक्तः॥ मालव्यसेवी तु जघन्यनामा खण्डेन्दुतुल्यश्रवणः सुसन्धिः। शुक्रेण सारः पिशुनः कविश्च रूक्षच्छविः स्थूलकराङ्गुलीकः॥ क्रूरो धनी स्थूलमतिः प्रतीतस्ताम्रच्छविः स्यात् परिहासशीलः। उरोऽङ्घ्रिहस्ते ष्वसिशक्तिपाशपरश्वधाङ्कश्च जघन्यनामा (२)॥ कुब्जो (३) नामा यः स शुद्धो ह्यधस्तात् क्षीणः किञ्चित्पूर्वकाये नतश्च। हंसासेवी नास्तिकोऽर्थैरुपेतो विद्वान् शूरः सूचकः स्यात् कृतज्ञः॥ कलास्वभिज्ञः कलहप्रियश्च प्रभूतभृत्यः प्रमदाजितश्च। सम्पूज्य लोकं प्रजहात्यकस्मात् कुब्जोऽयमुक्तः सततोद्यतश्च॥ मण्डलकनामधेयो ४ रुचकानुचरोऽभिचारवित् कुशलः। कृत्यावैतालादिषु कर्मसु विद्यासु चानुरतः॥